# भारतीय –चिकित्सा –केन्द्रीय– परिषद्
# नई दिल्ली

## आयुर्वेदीय– स्नातकोत्तर– पाठ्यक्रमः
## आयुर्वेदीय–स्नातकोत्तर –शिक्षणस्य प्रारम्भिकपरीक्षायाः पाठ्यविवरणम्
## प्रारम्भिक –परीक्षायाः विवरणम्

### 1. प्रथमं पत्रम् RESEARCH METHODOLOGY AND MEDICAL STATISTICS

### (A) METHODS OF RESEARCH

1. Aims and objects of research in Ayurveda, Ancient and modern methods of Research. Setting up of a basic research laboratory including Animal House.
2. Principles and methods of fundamental, clinical, drug and literary research. Principles of Manuscriptology and methods of survey of medical plants.
3. Radioisotopes and their role in medical research. Radiation and their biological effects.
4. Introduction of specific research instruments like Chromatography, Spectrometer, Colorimeter, Electro phoresis apparatus and other latest research instruments.

### (B) MEDICAL STATISTICS

1. Application of statistical methods to Ayurvedic research, collection, compilation and tabulation of medical statistics, methods of presentation of data, calculation of mean, median and mode, measurement of variability, standard deviation, standard error, normal probability curve.
2. Concept of regression and co-relation and their interpretation.
3. Tests of significance, tx2 and F test and their simple application.
4. Principle of medical experimentation on variation in experimental design.
5. Vital statistics.

### Alochya Granth

1. Ayurvediya Anusandhan Paddhati- P.V.Sharma
2. Research Methodology- Prof.V.J.Thakar
3. Drug Survey- Mayaram Uniyal
4. Methods in Biostatistics for Medical Students- B.K. Mahajan
5. Introduction to Biostatistics- Huldali Bancroft
6. Practical Problem in Statistics- D.N., Elhance
7. Health statistics- N.S.N. Rao
8. A short text book of Medica D.Statistics - Sir A.B.Hill
9. Introduction to Clinical - William C. Scheffer
10. A short textbook of Medical Statistics - Sir Austin Brocdtord Hill Indian Addition.

2. <u>द्वितीयं पत्रम्– मौलिकसिद्धान्ताः</u> (कश्चिदेको वर्गः ग्राह्यः नैदानकीयानैदानकीय विषयानुसार)

<u>वर्ग–क</u>

<u>अनैदानकीय</u>

(2) (क) आयुर्वेदीयमौलिकसिद्धान्ताः
(ख) शारीरस्यमौलिकसिद्धान्ताः
(ग) द्रव्यगुण–रसशास्त्रयोः मौलिकसिद्धान्ताः
(घ) चिकित्साविज्ञानस्याधारभूताः प्रायोगिकसिद्धान्ताः

<u>वर्ग–ख</u>

नैदानकीय

(2) (क) निदानचिकित्सयोः मौलिकसिद्धान्ताः
(ख) शल्य–शालक्ययोः मौलिकसिद्धान्ताः
(ग) प्रसूतितंत्र–स्त्रीरोग–कौमारभृत्ययोः मौलिकसिद्धान्ताः
(घ) चिकित्साविज्ञानस्याधारभूताः प्रायोगिकसिद्धान्ताः

आलोच्यग्रंथाः –

1. चरकसंहिता चक्रपाणि टीका सहित
2. सुश्रुतसंहिता डल्हण टीका, घाणेकर व्याख्या सहित
3. अष्टांग हृदय
4. अष्टांग संग्रह
5. काश्यप संहिता
6. माधव निदान
7. आयुर्वेद दर्शन
8. आयुर्वेदीय क्रिया शारीर – रणजीत राय देसाई
9. कायचिकित्सा – रामरक्ष पाठक
10. द्रव्यगुण विज्ञान – यादवजी त्रिकमजी आचार्य
11. सौश्रुती

## द्वितीयं प्रश्नपत्रम्
## वर्ग 'क'

### आयुर्वेदीयमौलिकसिद्धान्ताः

**आयुर्वेदीयमौलिकसिद्धान्ताः सांख्यवैशेषिकदर्शनाभ्यां सहेतरदर्शनानां सिद्धान्ताः पारिभाषिकशब्दाश्च ।**

आयुर्वेदशास्त्रे सन्निविष्टानां सांख्य–वैशेषिकदर्शनाभ्यां सहेतरदर्शनानां सिद्धान्ताः, आयुर्वेददर्शनस्य वैशिष्ट्यम् , पदार्थनिरूपणम् , तत्त्वप्रतिपादनम् , प्रमाणानि, वादविचारः, आयुर्वेदस्याधारभूतसिद्धान्तानां परिज्ञानम् , सृष्टिक्रमः, धातुभेदेन पुरुषविचारः। तंत्रयुक्तयः – परिचयः, प्रयोजनं, संख्या परिज्ञानं च । आयुर्वेदीयपारिभाषिकशब्दानां परिज्ञानम् ।

आलोच्यग्रंथाः –

1. चरक–सुश्रुतसंहितयोः सम्बद्धांशाः
2. सांख्यकारिका तत्त्वकौमुदीसहिता
3. वैशेषिकदर्शनं प्रशस्तपादभाष्यसहितम्
4. पातंजलयोगदर्शनं व्यासभाष्यसहितम्
5. वेदान्तसारः
6. आयुर्वेददर्शनम् – आचार्य राजकुमार जैन

### शारीरस्य (रचनाशारीरक्रियाशारीरयोः) मौलिकसिद्धान्ताः

व्यवहारिकरचनाशारीरक्रियाशारीरयोः प्रमुखसिद्धान्तानां विधीनां चाध्ययनम् । प्रकृतिविकृतिदृष्ट्या निम्नलिखितभावनां विशेषाध्ययनम्

1. स्नायुनाडीकण्डराविचारसहितः सिरा–धमनी–विचारः ।
2. चरक–सुश्रुतयोर्दृष्टिकोणसहितः स्रोतोविचारः ।
3. परिभाषा–प्रकार–परिचय–स्थान–रचना–क्रियास्वातन्त्र्य–महत्त्वपूर्वकं विस्तरेण मर्मविचारः ।
4. अग्निविवेकः तस्य महत्त्ववैशिष्ट्यप्रकारक्रियावैशिष्ट्यसहितः
5. महास्रोतसः वर्णनम्, कोष्ठविवेचनम्, हृदय–क्लोम–फुफ्फुस–यकृत्प्लीहोण्डुक–वृक्कनाभिडिम्ब–बस्तिप्रभृतिकोष्ठांगानां रचना–क्रिया–वैशिष्ट्यविचारः । अन्यसम्बन्धितनामवयवानां धात्वोजोज्ञानेन्द्रियमनः बृद्धीत्यादिभावानां क्रियावैशिष्ट्य–दृष्ट्या विचारः।

आलोच्यग्रंथाः –

1. चरकसंहितायाः सम्बद्धांशाः।
2. सुश्रुतसंहितायाः शारीरस्थानम्
3. अष्टांगसंग्रहाष्टांगहृदययोः सम्बद्धांशाः
4. प्रत्यक्षशारीरम्
5. अभिनवशारीरम्
6. पारिषद्यं शब्दार्थशारीरम्।

द्रव्यगुण– रसशास्त्रयोः मौलिकसिद्धान्ताः

द्रव्यगुणशास्त्रे वर्णितानां सिद्धान्तानां व्यावहारिकं विशिष्टं ज्ञानम् । विशिष्ट–गणानां वर्गाणां च विवेचनम् । रस–गुण–वीर्य–विपाक–प्रभाव–सिद्धान्तानां व्यावहारिकमहत्त्वम्, द्रव्यगुणशास्त्रे वर्णितानां दीपनपाचनादिपारिभाषिकशब्दानां परिज्ञानम् । द्रव्यानुसन्धानस्य नव्यविधीनां ज्ञानम् । रसद्रव्याणां वर्गीकरणं, वर्गीकरणस्य व्यावहारिकमहत्त्वम्, धातूपधातुरत्नोपरत्नविषोपविषादीनां परिचयस्तेषां प्रमुखाः योगाश्च।

पंचविधकषायकल्पना, आसवारिष्टकल्पना, भस्म–लौह–मण्डूर–रसौषधकल्पना, घृततैलकल्पना, अवलेहपाककल्पनाप्रभृतीनां व्यावहारिकं महत्त्वम् । भैषज्यकल्पनायाः नव्यविधीनां यन्त्राणां च ज्ञानम् ।

आलोच्यग्रंथाः –

1. द्रव्यगुणविज्ञानम् – यादव जी त्रिकम जी आचार्य
2. द्रव्यगुणविज्ञानम् – प्रियव्रत शर्मा
3. औषधगुणधर्मशास्त्र – पं. विश्वनाथ द्विवेदी
4. रसरत्नसमुच्चयः
5. रसेन्द्रसारसंग्रह :
6. क्रियात्मक ओषधि परिचय विज्ञान – विश्वनाथ द्विवेदी

चिकित्साविज्ञानस्याधारभूताः प्रायोगिकसिद्धान्ताः

आयुर्वेदचिकित्सायाः मौलिकसिद्धान्तसन्दर्भे आधुनिकचिकित्सा, होमियोचिकित्सा, यूनानीचिकित्सा, सिद्धचिकित्सा, चीनीचिकित्सा तिब्बतीचकित्साप्रभृतिप्रचलितचिकित्सापद्धतीनां मौलिकसिद्धान्तानां सामान्यज्ञानम् ।

कायचिकित्सायाः सामान्यविशिष्टसिद्धान्तानां परिचयः । दोषदूष्यविवेचनम् । दोषाणामन्योन्यावरणत्वं, दोषाणां संसर्ग–सन्निपातविचारः, स्रोतोदुष्टिविचारः, विविधरोगाणां रोग–वर्गाणां चिकित्साक्रमः । क्षीणाः वर्धयितव्याः, वृद्धाः ह्रासयितव्याः, षड्विधोपक्रमाः, द्विविधोपक्रमः (सन्तर्पणापतर्पणानि) षड्विधक्रियाकालोपक्रमः प्रभृतिचिकित्सा– सिद्धान्तानां व्यावहारिकं ज्ञानं, रसायनवाजीकरणविधीनां तयोः प्रयुज्यमानानामौषधयोगानां च सम्यक् परिज्ञानम् , पूर्वपश्चात्कर्मणां पंचकर्मविधीनां च व्यावहारिकं महत्त्वं, संस्थानाश्रितानां रोगवर्गाणां ज्ञानम् ।

आलोच्यग्रंथाः –

1. चरकसंहिता (चक्रपाणिटीका सहिता)
2. सुश्रुतसंहितायाः चिकित्सासम्बन्ध्युपयोगिनोंऽशाः ।
3. अष्टांगहृदयसंग्रहयोः चिकित्सासम्बन्ध्युपयोगिनोंऽशाः ।
4. चिकित्सादर्श – पं. राजेश्वरदत्त शास्त्री
5. काय चिकित्सा – रामरक्ष पाठक
6. रोग परीक्षाविधि – आचार्य प्रियव्रत शर्मा
7. पंचकर्म विज्ञान – हरिदास श्रीधर कस्तूरे

## <u>वर्ग 'ख'</u>

### <u>रोगनिदानस्य विकृतिविज्ञानस्य च मौलिकसिद्धान्ताः</u>

**रोगरोगिपरीक्षाणां विविधाः विधयः, विशेषतः**

**द्विविध–त्रिविध–चतुर्विध–पंचविध–षड्विधाष्टविध–दशविधपरीक्षाणां सांगोपांगमध्ययनं कियाक्षेत्रे च तासां विशेषोपादेयता । रोगीपरीक्षणे उपादेयानां नव्यप्रकियाणां यंत्राणां च ज्ञानम् । विकृतदोषधातुमलानां परीक्षणम्। विभिन्नरोगेषु परीक्षणस्योपयोगितादृष्ट्या विचारः, दोषधातुमलानामावरणानि, तेषां समीचीनं ज्ञानम्, आवरणजनितलक्षणानां रोगोत्पत्तौ विशिष्टहेतुत्वप्रतिपादनम् । आशयापकर्षः, त्रयो रोगमार्गाः, नैदानिकदृष्ट्या संचयादिकियाकालविवेकः, रोगाणां सम्प्राप्ति– निर्माणप्रकियायाः विशिष्टज्ञानं, रोगोत्पत्तौ सम्प्राप्तिनिर्माणस्य विशेषमहत्त्वम् । प्राकृतव्याधिप्रत्यनीकत्वम्। अरिष्टविज्ञानस्य विचारः ।**

**आलोच्यग्रंथाः –**

1. **चरकसंहितायाः सूत्र–निदान–विमानेन्द्रियस्थानानि**
2. **सुश्रुतसंहितायाः अष्टांगहृदयसंग्रहयोश्च सम्बद्धांशाः**
3. **माधवनिदानम् मधुकोशव्यारव्यासहितम्**
4. **आयुर्वेदीय व्याधि विज्ञान – यादव जी त्रिकम जी आचार्य**
5. **रोगी परीक्षाविधि – प्रियव्रत शर्मा**
6. **अभिनवविकृतिविज्ञानम् – रघुवीर प्रसाद त्रिवेदी**

### <u>शल्य–शालाक्ययोः मौलिकसिद्धान्ताः</u>

दोषधातुमलविवेकपुरस्संर रक्तस्य वैशिष्ट्यं चतुर्थदोषत्वप्रतिपादनं च । शल्य– तंत्रोपदिष्टानां व्याधीनां हेतु–सम्प्राप्ति–लक्षणपुरस्सरः चिकित्सानिर्देशः । यंत्रशस्त्रानुशस्त्रोपकरणानां परिज्ञानम् । शस्त्राणां गुणदोषाः, विविधरोगे अष्टविधशस्त्रकर्मणां प्रयोगज्ञानम् । शस्त्रसाध्याः व्याधयस्तेषां चिकित्साकमः । व्रणस्य प्रकाराः, व्रणबन्धविधयः, व्रणस्य षष्टिः उपकमाः । क्षारस्य तत्प्रयोगस्य महत्त्वम्, क्षारनिर्माणविधिः, तदुपयोगि– द्रव्याणां च परिचयः । व्याधिषु क्षारस्य निक्षेपविधिः । क्षारप्रयोगविधिज्ञानम्। अग्निकर्म तत्प्रयोगज्ञानं च । रक्तमोक्षणस्य विविधोपायानां सिराव्यधश्रृंगजलौकालाबूनां परिचयः प्रयोगज्ञानं च ।

ऊर्ध्वजत्रुगतानां रोगाणां निदानलक्षणपुरस्सरं सम्यग्ज्ञानम् । ऊर्ध्वजत्रुगतेषु रोगेषु प्रयुज्यमानानामाश्च्योतन–विडालक–पुटपाक तर्पणांजन–धूमपान– कवल–गण्डूष–रक्तमोक्षण–नस्य, शिरोबस्तिप्रभृतीनां कियाकल्पानां निर्माणप्रयोगविधेर्ज्ञानम् । शालाक्यरोगेषु प्रयुज्यमानानां शालाकादीनां नव्ययंत्राणां प्रयोगज्ञानपुरस्सरः परिचयः।

**आलोच्यग्रंथाः –**

1. **सुश्रुतसंहिताऽष्टांगहृदययोः सम्बद्धांशाः**
2. **सौश्रुती – रमानाथ द्विवेदी**
3. **शल्य समन्वय**

### <u>प्रसूतितन्त्र–स्त्रीरोग–कौमारभृत्यानां मौलिकसिद्धान्ताः</u>

**स्त्रीशारीरवैशिष्ट्यम् , गर्भाशयरचनाशारीरम्, आर्तवम्, ऋतुचकमनुयोगिनोऽगरसाः स्त्रीबीजगर्भाधानयमलादिगर्भाः, गर्भोपादानानि, गर्भस्य षड्धात्वात्मकत्वम् । मातृजादयो भावाः, गर्भाभिवृद्धिः, गर्भवपनं ,गर्भधराकला, गर्भस्य पोषणं, गर्भलिंगोत्पत्तिः, गर्भिणीपरिचर्या च, जराय्वपरानिर्माणं कर्माणि च ।**

प्रसवचर्यायाः विविधावस्थाः, रक्तस्रावस्तन्नियन्त्रणं च। गर्भनिष्क्रमणप्रकाराः, प्राकृतप्रसवोपक्रमाः ,वैकृतप्रसवः, योनिसंवरणादयः, मूढगर्भाः, गर्भस्रावपाते व्यापदस्तासां चिकित्सा च प्रसवोत्तरक्रमः, नालच्छेदनं ,स्तन्यविकाराः।

योनिव्यापदः, स्तन्यरोगाः, सामान्यरोगाः, रक्तगुल्मः, स्तनगर्भाशयाश्रितान्यर्बुदानि ,योनिभ्रंशः । औपसर्गिकयोनिरोगाः, स्त्रीजातानां रोगाणां निदानसम्प्राप्तिलक्षणपुरस्सरा चिकित्सा। उत्तरबस्तिः, पिचुः, वर्तिः, लेपः, धूपनं, धावनं, दहनादिविधयः । विविधस्त्रीरोगेषु विविधानि शल्यकर्माणि तेषां प्रयोगाश्च।

नवजातशिशोः परीक्षणं, शिशुपरिचर्या शिशुपोषणं च। बालशोष–पारिगर्भिक–फक्क–जलशीर्षकाश्चान्ये कास–श्वास–ग्रहण्यतिसार–पक्षाघात हृदयरोगादीनां, कुकूणक–सन्निरुद्धगुद–निरुद्धप्रकश–गुदकंटक–पोथकी–चर्मदल–क्षीरालसक–उल्बकरोग–छर्दि–बालापस्मार–कृमिरोग– तालुकण्टक–ग्रहबाधादिरोगाणां निदानलक्षणपुरस्सरा चिकित्सा।

आलोच्यग्रंथाः –

1. चरकसंहितायाः संबद्धांशा :
2. काश्यप संहिता
3. हारीत संहिता
4. अभिनव–प्रसूतितंत्र – डॉ. अयोध्या प्रसाद अचल
5. अभिनव स्त्रीरोग विज्ञान – डॉ. अयोध्या प्रसाद अचल
6. कुमार तंत्र समुच्चय – रमानाथ द्विवेदी

<u>चिकित्साविज्ञानस्याधारभूताः प्रायोगिकसिद्धान्ताः</u>

आयुर्वेदचिकित्सायाः मौलिकसिद्धान्तसन्दर्भे आधुनिकचिकित्सा, होमियोचिकित्सा, यूनानीचिकित्सा, सिद्धचिकित्सा, चीनीचिकित्सा तिब्बतीचकित्साप्रभृतिप्रचलितचिकित्सापद्धतीनां मौलिकसिद्धान्तानां सामान्यज्ञानम्।

कायचिकित्सायाः सामान्यविशिष्टसिद्धान्तानां परिचयः। दोषदूष्यविवेचनम्। दोषाणामन्योन्यावरणत्वं, दोषाणां संसर्ग–सन्निपातविचारः, स्रोतोदुष्टिविचारः, विविधरोगाणां रोग–वर्गाणां चिकित्साक्रमः । क्षीणाः वर्धयितव्याः, वृद्धाः ह्रासयितव्याः, षड्विधोपक्रमाः, द्विविधोपक्रमः ;सन्तर्पणापतर्पणानिद्ध षड्विधक्रियाकालोपक्रमः प्रभृतिचिकित्सा–सिद्धान्तानां व्यावहारिकं ज्ञानं, रसायनवाजीकरणविधीनां तयोः प्रयुज्यमानानामौषधयोगानां च सम्यक् परिज्ञानम् , पूर्वपश्चात्कर्मणां पंचकर्मविधीनां च व्यावहारिकं महत्त्वं, संस्थानाश्रितानां रोगवर्गाणां ज्ञानम्।

आलोच्यग्रंथाः –

1. चरकसंहिता (चक्रपाणिटीका सहिता)
2. सुश्रुतसंहितायाः चिकित्सासम्बन्ध्युपयोगिनोंऽशाः।
3. अष्टांगहृदयसंग्रहयोः चिकित्सासम्बन्ध्युपयोगिनोंऽशाः।
4. चिकित्सादर्श – पं. राजेश्वरदत्त शास्त्री
5. काय चिकित्सा – रामरक्ष पाठक
6. रोग परीक्षाविधि – आचार्य प्रियव्रत शर्मा
7. पंचकर्म विज्ञान – हरिदास श्रीधर कस्तूरे

# आयुर्वेदीय–स्नातकोत्तर–पाठ्यक्रमस्य द्वितीयखण्डस्य विषयानुसारिपाठ्यविवरणम्

## 1 – आयुर्वेदीयसिद्धान्ताः दर्शनं च

1. आयुर्वेदीयसिद्धान्ताः –

   चरकसंहिता–सुश्रुतसंहिताष्टांगहृदयप्रभृतिग्रंथेषु प्रतिपादितानामायुर्वेदसिद्धान्तानां परिचयः। विशेषतश्च पंचमहाभूत– त्रिदोषसिद्धान्तयोः विवेचनपुरस्सरं विशेषाध्ययनम्। नव्यालोके तेषां सिद्धान्तानामुपयोगिता वैज्ञानिकत्वं च।

2. दार्शनिकसिद्धान्ताः –

   आयुर्वेददर्शनस्य वैशिष्ट्यपुरस्सरमायुर्वेदशास्त्रे सन्निविष्टानां दार्शनिकसिद्धान्तानामालोचनात्मकमध्ययनम्। न्यायवैशेषिकसांख्यदर्शनानां प्रायोगिकपक्षानां समीक्षात्मकमध्ययनम्।

3. इतरदर्शनानां पर्यालोचनम् :–

   आयुर्वेदस्य प्रयोजनार्थं प्रतिपादितैः सिद्धान्तैः सहेतरदर्शनानां समन्वयात्मकं पर्यालोचनम्।

4. दर्शनशास्त्रस्य वाङ्.मयस्तस्येतिहासः परिचयश्च।

   आलोच्यग्रंथाः –

   1. चरकसंहिता (आयुर्वेद दीपिका टीका सहित)
   2. सुश्रुतसंहिता (डल्हण टीका सहित)
   3. अष्टांग संग्रहः
   4. अष्टांगहृदयम्
   5. वैशेषिकदर्शनम् (प्रशस्तपादभाष्यसहितम्)
   6. न्यायदर्शनम् (वात्स्यायनभाष्यसहितम्)
   7. पातंजलदर्शनम् व्यासभाष्यसहितम्
   8. वेदान्तसारः
   9. सर्वदर्शनसंग्रहः
   10. भारतीय दर्शन – बलदेव उपाध्याय
   11. आयुर्वेद दर्शन – आचार्य राजकुमार जैन

## 2 – संहिता

विषयेस्मिन् स्वरुच्यनुसारमेकस्याः संहितायाः विशेषाध्ययनमपेक्षते । प्रत्येकसंहिताग्रंथस्याध्ययनं निम्नलिखितानुसारं चतुर्षु प्रश्नपत्रेषु भविष्यति –

1. <u>चरकसंहिता</u>
   1. चक्रपाणिदत्तकृता आयुर्वेददीपिका टीका
   2. कविराजगंगाधरकृता जल्पकल्पतरुव्याख्या
   3. योगीन्द्रनाथसेनकृता चरकोपस्कारटीका
   4. चरकसंहिताया आद्युपदेष्टृ–प्रतिसंस्कर्तृ–टीकाकाराणां च समग्रेतिवृत्तात्मक : परिचयः

2. <u>सुश्रुतसंहिता</u>
   1. आचार्यडल्हणविरचिता निबन्धसंग्रहटीका
   2. चक्रपाणिविरचिता भानुमतिटीका, गयदासविरचिता च न्यायचन्द्रिका टीका
   3. हाराणचन्द्रेण विरचितं सुश्रुतार्थसंदीपनभाष्यम् ।
   4. सुश्रुतसंहिताया आद्युपदेष्टृ–प्रतिसंस्कर्तृ–टीकाकाराणां च समग्रेतिवृत्तात्मकः परिचयः

3. <u>अष्टांगसंग्रहाष्टांगहृदये</u>
   1. अष्टांगसंग्रहस्येन्दुकृता शशिलेखा टीका
   2. अष्टांगहृदयस्यारुणदत्तविरचिता सर्वांगसुन्दरा टीका
   3. अष्टांगहृदयस्य हेमाद्रिविरचिताऽऽयुर्वेदरसायनटीका
   4. उभयोः ग्रंथयोः कर्त्रोः टीकाकाराणां चेतिवृत्तात्मकः परिचयः

<u>आलोच्यग्रंथाः –</u>

1. उपर्युक्तटीकासहिताः संहिताग्रंथाः ।

# 3 – रचनाशारीरम्

1. <u>आयुर्वेदीयं रचनाशारीरम् –</u>

शरीरवर्णनम् – सामान्यः परिचयः, शरीरशब्दस्य निरुक्तिः, शरीरव्याख्या, शरीरस्य षडंगत्वम्, पार्थिवादिभेदेन शरीरांगविभागः ।

अवयवविज्ञानम् – कोष्ठशब्दस्य व्याख्या, कोष्ठांगानां संख्या, नामानि सामान्यपरिचयश्च ।
त्वग्विज्ञानम्– त्वक्शारीरम्, त्वचः स्वरूपकार्यप्रमाणादिवर्णनम्, केशश्मश्रुलोमनखानां सामान्यं वर्णनम् ।

स्नायुवर्णनम् – स्नायूनां स्वरूपसंख्याप्रकाराणां ज्ञानम् । चतुर्विधस्नायूनां परिचयः कण्डरावर्णनम् च ।

अस्थिविज्ञानम् – सामान्यपरिचयः, वेदवादिनां शल्यतंत्रवादिनां मतानुसारम् अस्थिगणना, अस्थ्नां पंचविधत्वम्, अस्थिसंघातम्, अस्थिवायुसम्बन्धश्च ।

सन्धिविज्ञानम् – सन्धिलक्षणम्, सन्धीनामष्टभेदानां निरूपणम् । अस्थिसन्धिसंख्यानम् ।
चेष्टानुसारं संधीनां द्वैविध्यम् ।

सिरावर्णनम् – सिराशब्दस्य व्याख्या, सिराणां संख्या, सिरावर्णविभक्तिकथनम् अवेध्यानां सिराणां सविस्तरं वर्णनम् ।

धमनीविज्ञानम् – धमनीशब्दस्य व्याख्या पर्यायाश्च । धमनीनां संख्या, प्रकारसंहितं सिराधमनीस्रोतसां भेदनिरूपणम् ।

स्रोतोविज्ञानम् – स्रोतस् शब्दस्य निरुक्तिः, स्रोतसां लक्षणम्, चरकसुश्रुतयोः मतानुसारं स्रोतसां संख्या प्रकाराश्च । बहिर्मुखस्रोतसां सामान्यपरिचयः ।

नेत्र–त्वक्–कर्ण–नासिका–जिह्वानां ज्ञानेन्द्रियाधिष्ठानत्वं, तेषां सचित्रं परिचयश्च।

2. <u>मर्मशारीरं शरीरप्रमाणविज्ञानं च</u>

मर्मशब्दस्य निरुक्तिः लक्षणं च । सुश्रुतोक्तमर्मणां संख्यास्वरूपादिवर्णनम् । मांसादिभेदेन मर्मसंख्याविभाजनम्। शाखाश्रितानां मर्मणां संख्या, नामानि च । मर्मणां सद्यः प्राणहरत्वादिभेदास्तदनुसारं तेषां परिचय : । मर्मणां सद्यः प्राणहरत्वादि परिणामविशेष विमर्शः मर्मोपघातानां विशेषलक्षणानां मर्मवेधजविकाराणां च ज्ञानं प्रतिकारविधिसहितम् ।

शल्यतन्त्रे मर्मविज्ञानस्य प्रयोजनम् , चरकोक्तानि श्रोणिमर्माणि, तेषां सम्यक् ज्ञानम् ।

1. <u>गर्भावक्रान्तिः ऊतकविज्ञानीयं चानुवांशिकीसहितम् –</u>

अभिनिवृत्तिशरीरम्, गर्भावक्रान्तिः, गर्भशारीरम्, गर्भस्य मातृजादिषड्भावाः, गर्भपोषणवृद्धिक्रमः, शुक्रशेणितयोः स्वरूपं, तयोः बीज–बीजभाग–बीजभागावयवादीनां प्राकृतवैकृतावस्थयोः परिज्ञानम्, ऋतुमती–सद्योगृहीतगर्भासन्नप्रसवाद्यवस्थासूत्पन्नानि लक्षणानि, आनुवांशिकी विज्ञानीयं, पुंसवनविज्ञानीयं च ।

2. <u>तन्त्रशारीरमन्तःस्राविग्रंथिविज्ञानीयं च –</u>

षट्चक्रनिरूपणं, बाह्यचक्रपतिपादनं, इडा–पिंगला–सुषम्नानाडीनां वर्णनम्, वातनाडीतन्त्रम्, मस्तिष्कसौषुम्निकतन्त्रयोः परिबोधः । अन्तःस्राविग्रंथीनां सम्यगवबोधः ।

एतेषां विषयाणामभिनवदृष्ट्या तुलनात्मकं विवेचनात्मकं चाध्ययनम् ।

<u>आलोच्यग्रंथाः –</u>

1. बृहत्त्रयी–लघुत्रयीषूपलब्धाः सम्बद्धांशाः ।
2. प्रत्यक्षशारीरम् –गणनाथ सेन
3. अभिनवशारीरम् –दामोदरशर्मा गौड
4. पारिषद्यं शब्दार्थशारीरम् –दामोदरशर्मा गौड
5. बृहच्छारीरम् –वारियर
6. शिवसंहिता

## 4 – क्रियाशारीरम

1. <u>देहक्रियाविज्ञानसहितं दोषधातुमलविज्ञानीयम्</u>

   दोषधातुमलमूलं हि शरीरम् । दोषधातुमलानां स्वरूप–गुण–कर्म–प्रकार–धातुत्व–पांचभौतिकत्वनिरूपणम् । दोषधातुमलानां वृद्धिक्षयलिंगानि, अग्निविवेकः, आहारपाकविवेचनम् । स्रोतोविवेकः स्रोतसां स्वरूपं लक्षणसंख्याप्रकारादीनां सम्यक् ज्ञानम् । धातुपाकक्रमः, धातुपाके तत्पोषणे चाग्नि–स्रोतसोःमहत्त्वम् रससंवहनं च । मूत्रपुरीषस्वेदादिमलानां निर्माण–कर्मोत्सर्गविवेचनम् । ओजोनिरूपणम् ।

   नव्यमतेन विविधजीवभौतिक–जीवरासायनिकसिद्धान्तानां क्रियाशारीरोपयोगिव्यावहारिकं ज्ञानम् ।

2. <u>प्रकृति–सत्त्व–सारादिविज्ञानीयम्</u>

   प्रकृतिज्ञानस्य महत्त्वम्, प्रकृतिस्वरूपं तद्भेदाश्च, प्राच्यनव्यमतयोः प्रकृतिविनिश्चयविधिः, सत्त्व–सार–संहनन–प्रमाण–सात्म्याहारशक्ति–व्यायामशक्तिवयसामित्येषां भावानां भेदोपादेयतापुरस्सरं सम्यक् ज्ञानम् । प्रमाणविनिश्चयस्य नव्यविधीनां परिचयः ।

3. <u>कोष्ठांगक्रियाशारीरम</u>

   कोष्ठांगानां हृदय–यकृत्–प्लीहाद्यवयवानां क्रियाविवेचनं प्राच्यनव्यमतसमन्वयपुरस्सरम्। तंत्रिका–ज्ञानेन्द्रियविज्ञानीयमन्तःस्राविग्रन्थीनामंगरसास्तेषां शरीरावयवेषु प्रभावः, निःस्रोतस्ग्रंथीनां नामस्वरूपस्थानकर्मान्तःस्रावादीनां विशेषज्ञानम् ।

4. <u>प्रायोगिकं क्रियाशारीरम</u>

   शारीरभावानां दोष–धातूपधातु–मलादीनां प्रयोगशालीयपरीक्षणविधिज्ञानम् । मांसपेशी–नाडी–हृदयादिभावानामंगावयवानां च कर्मणां प्रायोगिकं (एप्लाइड) परीक्षणम् ।

<u>आलोच्यग्रंथाः –</u>


1. चरकसुश्रुतवाग्भटादीनामुपयोगिनोंऽशाः
2. आयुर्वेदीय क्रियाशारीर –रणजीतरायकृत
3. देहधात्वग्नि विज्ञान –पं.हरिदत्त शास्त्री
4. कायचिकित्सा परिचय –सी.द्वारकानाथ
5. प्राकृत अग्निविज्ञान –सी.द्वारकानाथ
6. प्राकृत दोषविज्ञान –आचार्य निरंजन देव
7. शरीर क्रियाविज्ञान –शिवचरण ध्यानी
8. शरीरक्रियाविज्ञानस्याधुनिकाः ग्रंथाः ।

# 5 – स्वस्थवृत्तम्

## 1. वैयक्तिकं स्वस्थवृत्तं सद्वृत्तं च ।

किं नाम स्वास्थ्यम्, प्राचीनार्वाचीनाचार्यैः विश्व–स्वास्थ्यसंगठनेन च स्वीकृता स्वस्थस्य परिभाषा । विभिन्नशास्त्रेषु, प्रतिपादितानि स्वस्थस्य लक्षणानि । आयुर्वेदीय–स्वस्थवृत्तस्य प्रयोजनं महत्त्वं च । चर्यात्रयः, त्रय उपस्तम्भाः, धारणीयाधारणीयाश्च वेगाः । किं नाम सद्वृत्तम्, सात्म्यासात्मयविचारः, आहारविहारैः तस्य पांचभौतिकत्वं च । आहार–विधिविशेषायतनानि, आहारद्रव्याणि, विविधाहारद्रव्याणां शाकाहारमांसाहारयोश्च गुणावगुणाः, मात्राविचारः, कालविचारः, विषमभोजनजन्याःव्याधयः । निन्दितानिन्दिताश्च पुरुषा : । पोषणं कुपोषणं च । पोषणविषयको राष्ट्रीयकार्यक्रमः तस्य शासकीयसामाजिकोपलब्धयः परिणामाश्च ।

## 2. रोगानुत्पादनीयं सामाजिकं च स्वस्थवृत्तम् ।

सामाजिके स्वस्थवृत्ते भूमेः वायोः जलस्य प्रकाशस्य देशस्य ( निवासस्थानस्य ) च महत्त्वम् । एतेषां गुणाः, दोषाः, प्राकृतं वैकृतं च स्वरूपमेषां दोष–विकृतिनिवारणोपायाः । भूमेः महत्त्वं शोधनं च निवासयोग्यायोग्या भूमिः गृहाणि च । जलस्य महत्त्वं, प्राप्तिः, प्रकाराः, शुद्धिप्रकाराः, परीक्षणविधयः सेवनविधयश्च । वायोर्महत्त्वं गुणाः । संगठनं शुद्धिप्रकाराः । प्राकृतं वैकृतं च प्रवीजनम् ।

विविधान्यपद्रव्याणि, नगरेषु ग्रामेषु चापद्रव्यनिवारणव्यवस्था । सार्वजनिकशौचस्थान–व्यवस्था, शवविनाशव्यवस्थायामग्निदाहः, भूमौ स्थापनं, विद्युद्दाहो वा, औद्योगिकसंस्थाने स्वास्थ्यरक्षणोपायाः । विद्य लयादिसार्वजनिकं स्थानं भवनं, तत्र वायोः प्रकाशस्य च व्यवस्था ,आसनं, क्रीडास्थलं, छात्राणां स्वास्थ्यपरीक्षाप्रबन्धः । परिवारकल्याणयोजनाया आवश्यकता, उपायाः , उपयोगिता, वैयक्तिकसार्वजनिकस्वास्थ्योपरि तस्याः प्रभावः, मातृशिशुकल्याणकेन्द्राणि ।

## 3. औपसर्गिकरोगप्रतिरोधः

विविधाः संक्रामकरोगाः, जनपदोध्वंसकराश्च भावाः, तेषां सम्यग्ज्ञानं निवारणोपायाः विसंक्रमणविधयश्च । व्याधिक्षमत्वं तस्य प्रकाराः, कुप्रसंगजाः विविधाः रोगाः । चिकित्सालयभवनस्य स्थानं तत्र प्रकाशादिव्यवस्था च । स्वास्थ्यप्रशासनस्य ज्ञानं, तेषां नियमोपनियमानां च ज्ञानम् । पर्यावरणस्य राष्ट्रीयं सामाजिकं च महत्त्वं, संरक्षणोपायाश्च, भू–जल–वाय्वादीनां प्रदूषणं, तन्निवारणेपायाश्च ।

## 4. योगः निसर्गोपचारश्च

योग्यस्यैतिह्यं, व्युत्पत्तिः, निरुक्तिः, परिभाषा, प्रयोजनज्ञानसहितं सामान्यं परिचयः । आयुर्वेदे योगप्रतिपादनं, योगद्वारा स्वास्थ्यसाधनं, योगस्याष्टांगानि तेषां ज्ञानम्, प्रमुखासनानां प्रयोगविधयः, षट्कर्मविवेचनं, योगस्य स्वास्थ्यसम्बन्धिताः उपयोगिनों ऽ शाः, योगसिद्धिकराश्च भावाः निसर्गोपचारस्य प्रयोजनमहत्त्वपुरस्सरं परिचयः । प्राकृतिकचिकित्सायां जलस्य प्रयोगः, महत्त्वं च । पादप्रक्षालनबस्तिकटिस्नानावगाहनादीनां महत्त्वं जल –पट्टिकानां प्रयोगः । वाष्पस्नानम्, मृत्तिकाप्रयोगस्य महत्त्वं प्रयोगविधयश्च । सूर्यप्रकाशस्यातपस्नानस्य च महत्त्वं प्रयोगविधिश्च सूर्यरश्मिचिकित्सालयवर्णनम्।

## आलोच्यग्रंथाः –


1. चरकसुश्रुतवाग्भटादिसंहितानां सम्बद्धांशाः ।
2. हठयोग प्रदीपिका ।
3. स्वस्थवृत्तसमुच्चय – वैद्य पं. राजेश्वरदत्त शास्त्री
4. स्वास्थ्य विज्ञान – डॉ. भा.गो. घाणेकर
5. योग और आयुर्वेद – आचार्य राजकुमार जैन
6. प्राकृतिक चिकित्सा – केदारनाथ गुप्त

# 6 – द्रव्यगुणविज्ञानम्

1. **नामरूपविज्ञानम्**

द्रव्याणां नामज्ञानस्य महत्त्वम्, वेदेषु ओषधीनां नामरूपज्ञानस्य बीजम् । ओषधीनां विविधनामकरणम्, तन्नाम्नां पर्यायाणां च सोपपत्तिकं वर्गीकृतं च विवेचनम् ।

रूपज्ञानस्य प्रयोजनं, ओषधीनां स्थूलाकृतिविवरणं सूक्ष्मरचनाविवरणं च । उपयुक्तयन्त्रोपकरणानां परिचयः कार्यपद्धतिज्ञानं च ।

2. **गुणकर्मविज्ञानम्**

मौलिकसिद्धान्तानां रसगुणवीर्यविपाकादीनां विवेचनम्, औषधद्रव्याणां आहारद्रव्यणां च गुणकर्मज्ञानमद्यावधिज्ञानाधारितम् ।

गुणकर्मज्ञानस्य नव्यविधीनामुपकरणयन्त्राणां च परिचयः कार्यपद्धतिज्ञानं च ।

3. **प्रयोगविज्ञानम् औषधयोगविज्ञानं च**

औषधद्रव्याणाम् आहारद्रव्याणां च विविधामयेषु संप्राप्तिमूलकं सयुक्तिकं प्रयोगज्ञानम् । प्रसिद्धौषधयोगानां विवरणात्मकं सयुक्तिकं च प्रयोगज्ञानं, कर्मक्षेत्रनिरूपण च, द्रव्यसंयोग–विरोध–मात्रानुपानादीनां भावनां विचारः ।

4. **निघण्टोः स्वरूपं विकासक्रमश्च**

द्रव्यगुणवाङ्मयस्येतिवृत्तात्मकः परिचयः।
धन्वन्तरि–राजनिघण्टुप्रभृतिसमस्तनिघण्टुग्रंथानां तेषां कर्तृणां काल–निर्धारणपुरस्सरः परिचय : ।

**आलोच्यग्रंथाः –**

1. ऋग्वेदस्य ओषधिसूक्तं सायणभाष्यसहितम् ।
2. चरकसुश्रुतवाग्भटादिसंहितानामुयोगिनोंऽशाः ।
3. द्रव्यगुणविज्ञानम् –यादवजी त्रिकमजी आचार्य
4. द्रव्यगुणविज्ञानम् –आचार्य प्रियव्रत शर्मा
5. औषधगुणविज्ञानम् –पं.विश्वनाथ द्विवेदी
6. क्रियात्मक औषधपरिचयविज्ञान –पं.विश्वनाथ द्विवेदी
7. धन्वन्तरिनिघण्टुः राजनिघण्टुसहितः
8. शाङ्र्गधरसंहिता
9. योगरत्नाकर
10. औषधगुणधर्मशास्त्र –पं.गंगाधरशास्त्री गुणे
11. द्रव्यगुणविज्ञान सम्बन्धी आधुनिक ग्रंथ

# 7 – रसशास्त्रम्

## 1. रसशास्त्रस्याधारभूतसिद्धान्ताः

रसशास्त्रस्य आधारभूतसिद्धान्तानां विवेचनम् । रसभेदाः सनिरुक्तिकाः, रसखनिजाः, रसगतयः, रसशोधनं, संस्काराः रसमूर्च्छना–जारणा च ।

महारसोपरस–साधारणरस–लौहोपलौह–रत्नोपरत्न–विषोपविष–सुधावर्गीयाणां द्रव्याणां परिचय–भेद–शोधन–मारण –गुण–कर्म–प्रयोगादीनां प्राच्यपाश्चात्यदृशा ज्ञानम् ।

रसशास्त्रे क्रियमाणाद्यतनशोधनकर्मणां विस्तृतज्ञानम् ।

## 2. रसयोगानां निर्माणम्

रसशालानिर्माणं, तत्कर्मविभागः कर्मचारिगणाश्च, रसकर्मोपयोगिनामुपकरणानां यन्त्र–मूषा–पुटादीनां, पारिभाषिकशब्दानां च विवेचनात्मकं ज्ञानम् । रससिंदूर–रसकर्पूर–मकरध्वज–मल्लचन्द्रोदयादिप्रसिद्धरसकल्पनानां निर्माणम्, कज्जली–पर्पटी–प्रसिद्धानां विविधौषधयोगानां विवरणात्मकं सयुक्तिकं प्रयोगज्ञानम् । तेषां कार्यक्षेत्र–कार्यकारणपद्धतीनां विवेचनात्मकं ज्ञानम् ।

## 3. औषधमानकीकरणविज्ञानम्

विविधौषधकल्पना–शास्त्रीयविधीनां वैज्ञानिकविधीनां च मानकीकरणज्ञानम् ।

मानकीकरणार्थं भेषजरसायनविज्ञानस्य तत्रत्यानां सिद्धान्तानां च ज्ञानम् ।

## 4. रसशास्त्रस्य वाङ्मयः

रसशास्त्रस्य विस्तृतमितिवृत्तम् । वैदिककालादारभ्यास्य विकासक्रमविवेचनम् । दार्शनिकपृष्ठभूमिः रसेश्वरदर्शनं च । रससिद्धास्तेषां साहित्यम्। रसशास्त्रस्य विकासे विभिन्न–सम्प्रदायानां योगदानम् । रसद्रव्याणां कल्पना, ऐतिहासिकदृष्ट्या प्रयोगज्ञानम्। रसशालायास्तथा तत्रोपयुज्यमानानां यन्त्रोपकरणादीनामैतिहासिकदृष्ट्या विकासक्रमज्ञानम्।

रसशास्त्रसन्दर्भे आनन्दकन्दग्रंथस्य योगदानं विवेचनात्मकमध्ययनं च ।

**आलोच्यग्रंथाः –**

1. रसेन्द्रचिन्तामणि
2. रसकामधेनु
3. रसरत्नसमुच्चय
4. आनन्दकन्द
5. रसार्णव
6. योगरत्नाकर
7. भारतीय रसशास्त्र – विश्वनाथ द्विवेदी
8. रस– भैषज्य कल्पना विज्ञाान – सन्तोष खाण्डल
9. आधुनिक रसायनशास्त्र के ग्रंथ

# 8 – भैषज्यकल्पना

## 1. भैषज्यकल्पनाया आधारभूतसिद्धान्ताः

भैषज्यकल्पनायाः निरुक्तिः, व्युत्पत्तिः विकासक्रमश्च । भैषज्यकल्पनाशास्त्रस्याधारभूतसिद्धान्तानां परिचयः । आयुर्वेदशास्त्रे भैषज्यकल्पनाशास्त्रस्योपयोगिता महत्त्वं च । द्रव्यप्राप्तिस्थान–संग्रह–संरक्षणविधीनां सम्यक् ज्ञानम् । रसशालानिर्माणं तत्कर्मविभागः, कर्मचारिगणाश्च। रसकर्मोपयोगिनामुपरकणानां सम्यक् ज्ञानम् ।

## 2. रसशास्त्रम्

भैषज्यकल्पनायाः विकासे रसशास्त्रस्य महत्त्वमुपयोगिता च । रसशास्त्रस्य सिद्धान्तानां परिचयः ।

रस–महारसोपरस–साधारणरस–लौह–रत्नोपरत्न–विषोपविषादीनां सम्यक् ज्ञानम् । विविधरसयोगानां निर्माणज्ञानम् ।

## 3. भैषज्यनिर्माणमोषधिमानकीकरणं च

भैषज्यनिर्माणार्थमाधुनिकयंत्रोपकरणादीनां प्रयोगज्ञानम् । यन्त्र–मूषा–पुटादीनां सम्यक् परिज्ञानम् । भैषज्यकल्पनाशास्त्रे रसशास्त्रे च प्रयुक्तानां पारिभाषिकशब्दानां विवेचनात्मकं ज्ञानम्

प्रसिद्धौषधयोगानां विवरणात्मकं सयुक्तिकं प्रयोगज्ञानम् । तेषां कार्यक्षेत्र–कार्यकारणपद्धतीनां विवेचनात्मकं ज्ञानम् । भैषज्यकल्पनाविषये क्रियमाणानामद्यतनशोधकर्मणां विस्तृतं ज्ञानम् ।

विविधौषधकल्पनानां शास्त्रीयवैज्ञानिकविधीनां च मानकीकरणस्य ज्ञानम् ।

मानकीकरणार्थं भेषजरसायनविज्ञानस्य, तंत्रस्य सिद्धान्तानां च परिज्ञानम् ।

शासनद्वारा निर्मितानां विविधानामधिनियमानां परिशीलनम् ।

## 4. भैषज्यकल्पनायाः वाङ्मयस्येतिहासः

भैषज्यकल्पनाशास्त्रस्य वैदिककालादारभ्य विकासक्रमपुरस्सरं विस्तृतमितिवृत्तम्। भैषज्यकल्पनायाः साहित्यमाचार्याश्च। रसशाला तथा तत्र प्रयुज्यमानानां यन्त्रोपकरणादीनामैतिहासिकदृष्ट्या विकासक्रमज्ञानम्।

## आलोच्यग्रंथाः –


1. चरक–सुश्रुत–वाग्भटादिसंहितानामुपयोगिनोंऽशाः ।
2. शाङ्र्गधरसंहिता (उपयोगी अंश )
3. भैषज्यरत्नावली
4. क्रियात्मक औषधि परिचय विज्ञान
5. प्रत्यक्ष औषधि निर्माण –पं. विश्वनाथ द्विवेदी
6. द्रव्यगुण विज्ञान ( परिभाषा खण्ड ) – यादव जी
7. विभिन्न अधिनियम
8. रस–भैषज्यकल्पनाविज्ञान – सन्तोष खाण्डल
9. आधुनिक भेषजरसायनशास्त्र के ग्रंथ

# 9 – रोगनिदानं विकृतिविज्ञानं च

## 1. दोषदूष्यादिविज्ञानम्

दोषाणां क्षयवृद्धिप्रकोपहेतवः लक्षणानि च । धातूपधातुमलानां दूष्यत्वमेतेषां क्षयवृद्धि–प्रदोषजहेतवः लक्षणानि च । दोष दूष्यादीनामाश्रयाश्रयीभावसम्बन्धः, दोष–दूष्यादीनामाशयापकर्षः, विलोमगतिः, विमार्गगमनानुबंध्यानुबंधत्वं, प्राकृत–वैकृतगतिः, सप्रत्यनीकं निष्प्रत्यनीकत्वं च । त्रयो रोगमार्गाः, मार्गगतरोगाः, इन्द्रियप्रदोषजाः विकाराः, धातुप्रदोषजाः विकाराः, उपधातुप्रदोषजाः विकाराः,गरप्रदोषजाः विकाराः, सामान्यजाः नानात्मजाश्च विकाराः, दोषाणां कोष्ठात् शाखादिगमनं, शाखाभ्यश्च कोष्ठाभिगमनम् । दोषाणां पृथक्–संसृष्ट–सन्निपातभेदाः, लीनस्तम्भिताः दोषास्तेषां विकृतयश्च । स्रोतोदुष्टिः, दुष्टिलक्षणं, विद्धलक्षणं, हेतवश्च प्रकृति–विकृतिज्ञानपुरस्सरं स्रोतोविज्ञानं, स्रोतसां रचनाप्रकाराः, भेदाः, क्रिया–शारीरं च ।

## 2. विशिष्टसम्प्राप्तिविज्ञानम्

भेदोपभेदसहितं निदानपंचकम्, संख्याविकल्पादिविशिष्टभेदपुरस्सरं सम्प्राप्तिज्ञानम्, सम्प्राप्तिघटकाः, दोषदूष्यसम्मूर्च्छना, षट्क्रियाकालाः, चयप्रकोपप्रशमाः, हेतुलक्षणयोः ,सम्प्राप्तिलक्षणयोश्च सम्बन्धः, किं नाम आमः ? कथं चासौ जायते, दोषदूष्याणां साम–निराम पच्यमानादय अवस्थाः । चरकोक्तानां रोगाणां विशिष्टसम्प्राप्तिः,निर्माणप्रक्रिया सामान्यप्रक्रिया च ।

## 3. रोगीरोगपरीक्षाविज्ञानम्

विभिन्नपद्धतिषु रोगी–रोग–परीक्षाक्रमस्यैतिह्यं, तद्वैशिष्ट्यं च ।
द्विविध–त्रिविध–चतुर्विध–पंचविध–षड्विधाष्टविध दशविध–द्वादशविधाश्च रोगी–रोग–परीक्षाविधयः । दोषदूष्यसम्बन्धीनि विभिन्नविकृतिविज्ञानीय–प्रयोगशालीयपरीक्षणानि। आयुर्वेदीयदृष्टिकोणेन च तेषां सामंजस्यम् । स्रोतोपरीक्षा, षडंगपरीक्षा, आवयविकपरीक्षा, साध्यासाध्यतापरीक्षणं विशिष्टज्ञानसहितम् । अरिष्टविज्ञानमुपद्रवज्ञानसहितम् । नव्यपरीक्षणविधीनां सम्यक् ज्ञानसहितं सामान्यविशेषं चातुरवृत्तपत्रकम्, परीक्षाक्रमे तस्य महत्त्वं च ।

## 4. विकृतिविज्ञानसहितं जीवाणुविज्ञानम्

कृमिविज्ञानम्, जीवाणुविज्ञानम्, विषाणुविज्ञानम्, कवकविज्ञानम् । व्याधिक्षमत्वं तत्सन्दर्भे ओजोविज्ञानं च । सात्म्यासात्म्यविज्ञानम्, जनपदोध्वंसविज्ञानम् प्रायोगिकविकृति–विज्ञानम्, प्रायोगिकं सूक्ष्मजीवविज्ञानसहितं जैवरसायनविज्ञानम् । अन्यपद्धतिषु रोगविज्ञानस्य सिद्धान्तानां परिचयः वैशिष्ट्यं च ।

### आलोच्यग्रंथाः –


1. चरकसंहितायाः सूत्र–निदान–विमानेन्द्रियस्थानानि ।
2. सुश्रुतसंहितायाः सम्बद्धांशाः ।
3. अष्टांगहृदयसंग्रहयोः सम्बद्धांशा : ।
4. माधवनिदानं समधुकोशव्याख्यासहितम्
5. सिद्धान्तनिदानम् –गणनाथ सेन
6. आयुर्वेदीयव्याधि विज्ञान –यादवजी त्रिकमजी आचार्य
7. रोगी परीक्षाविधि –प्रियव्रत शर्मा
8. अभिनव विकृति विज्ञान –रघुवीर प्रसाद त्रिवेदी

## 10 – मनोविज्ञानम्

### 1. मनोव्यापारसहितं मनोविज्ञानीयम्

मनसः स्वरूपं, स्थानं, विषयाः, गुणदोषौ च । मनसरुभयात्मकत्वं, भौतिकत्वमाहंकारिकत्वमणुमयत्वं च । मनोव्यापारनिरूपणं मनोबुद्ध्यहंकारादिभावानां परिचयः, प्रतिशरीरं मनसः भिन्नत्वं च । मनोव्यापारे प्राणोदान–साधक–बोधकादिदोषाणां सम्बन्धः, कथं प्रकोपयन्ति मनोदोषाः शारीरदोषान् ? ज्ञानेन्द्रियाणां विषयाः ज्ञानोत्पत्तिप्रक्रियायां मनसो प्राधान्यमिन्द्रियार्थग्रहणानन्तरं ज्ञानोत्पत्तौ मनसो दायित्वम् । मनसः कारणद्रव्यत्वप्रतिपादनमिन्द्रियाणामुद्योजकः वायुः, मनसः प्रेरणा । वाक्प्रवृत्तौ मनसः योगदानम् । शब्दस्पर्शरूपरसगंधानां ग्राहकं मनः, तस्य महत्त्वं च ।

मनोवहस्रोतसां परिचयः, दोषपूर्णेषु मनोवहस्रोतःसु नरः स्वप्नान् प्रपश्यति । निद्राहेतुस्तमः, सत्त्वं जागरणे स्मृतं, जागरणे मनसः दायित्वम् । स्वप्नविचारः, निद्राविचारः, तन्द्राविचारश्च ।

आलातचक्रन्यायनिरूपणं, वीचितरंगन्यायनिरूपणं ,कदम्बमुकुन्दन्यायनिरूपणं च ।

अर्वाचीनमतानुसारं मनोविज्ञानस्य सिद्धान्ताः, मनोनिरूपणपुरस्सरं मस्तिष्कव्यापारविवेचनम्।

### 2. मनोवैकारिकी भूतविद्यातंत्रं च

मानसवेगाः, मनोविकाराः, मानसदोषौ, मनःशरीरयोः परस्परानुविधायित्वम् । मनसः चंचलत्वं, मनसो व्याधीनामाश्रयत्वं ,मानसरोगेषु दोषाणां परस्परानुबन्धः, मानसव्याध्युत्पत्तौ शारीरदोषाणां विकारकारित्वम् । इन्द्रियाधीनानां हीनमिथ्यातियोगाणां परिचयः ।

सत्त्वपरीक्षा, त्रिविधसत्त्वभेदकथनम् ,प्रज्ञापराधलक्षणं तस्योदाहरणानि । पापस्य पूर्वजन्मोपार्जितानां चाशुभकर्मणां रोगकारकत्वम् ।

अधर्मः रोगोत्पादने कथं कार्मुकः । मानसविकाराणामुत्पत्तौ वेगानां प्राधान्यम् ।

अहितसेवने मनसः दायित्वनिरूपणम् । आचाररसायननियमानामुपेक्षणं, सोदाहरणं मनसः स्वास्थ्यरक्षार्थं चरकोक्तं विधानम् ।

भूतविद्यातंत्रान्तर्गतप्रतिपादितविषयाणां प्राच्यार्वाचीनमतपुरस्सरं विशेषाध्ययनम् ।

### 3. मानसरोगाः, चिकित्सा योगनिरूपणं च

समस्तमानसरोगाणां विवेचनम्, प्राच्यनव्यशास्त्रयोः वर्णितं विविधमानसरोगाणां समग्रज्ञानम् । उभयशास्त्रयोः प्रतिपादिताः चिकित्सासिद्धान्तसहिताः सामान्य–विशिष्ट चिकित्सायोगाः, विविधोपचारोपायाश्च ।

मनोविज्ञानसन्दर्भे योगस्य वैशिष्ट्यं योगशास्त्रस्योपयोगिता महत्त्वं च । योगस्य दार्शनिकस्वरूपज्ञानसहितं तस्याष्टांगानां समीचीनं ज्ञानम् । आयुर्वेददृष्ट्या तस्याध्ययनस्योपगिता । आयुर्वेदशास्त्रे प्रतिपादिताः योगस्य सिद्धान्ताः ।

### 4. सेतिहासः वाङ्मयः

मनोविज्ञानस्य भूतविद्यातंत्रस्य चेतिहासः। उभयशास्त्रयोः उपलब्धानुपलब्धवाङ्.मयस्तस्यकर्तारस्तेषां परिचयश्च।

### आलोच्यग्रंथाः –

1. चरकसुश्रुतवाग्भटादीनामितरप्राच्यग्रन्थानां चोपयोगिनोंऽशाः।
2. प्राचीनमनोविकारविज्ञानम् –अयोध्या प्रसाद अचल
3. आयुर्वेदीय पदार्थविज्ञान –रणजीत राय देसाई
4. आयुर्वेददर्शन –आचार्य राजकुमार जैन
5. पुरुषविचय –प्रो. विनायक जे0 ठाकर
6. आयुर्वेदीय मानसविज्ञान –प्रो. रामहर्ष सिंह
7. योग और आयुर्वेद –आचार्य राजकुमार जैन

# 11 – कायचिकित्सा

1. <u>निदानम्</u>

व्याधिविज्ञानोपायाः निदानपंचकस्य सांगोपांगविवेचनम् । आयुर्वेदीयनिदानपद्धतेः वैशिष्ट्यं वैज्ञानिकता च । प्राचीननव्यनैदानिकविधीनां तुलनात्मकः परिचयः । आधुनिकप्रचलितानां रोगनिदानविधीनां प्रयुक्तसाधनानां यंत्राणामुपकरणानां च परिचयः प्रयोगविधिपरिबोधसहितः । हृत्परीक्षण–क्षकिरणादिविधीनां सम्यक्ज्ञानम् ।

रोगी–रोगपरीक्षाविधिः, त्रिविधपंचविधषड्विधाष्टाविधदशविधातुरपरीक्षाविधिः । सांस्थानिकावयवस्रोतानुसारिपरीक्षाविधिः, आयुर्वेदोक्तनाडीपरीक्षा, रक्त–मूत्र–शुक्र–ष्ठीवन–ब्रह्मचारीत्येषां परीक्षाज्ञानं, रोगमार्गपरिज्ञानम् । प्रचलितसुप्रसिद्धरोगाणां निदानसम्प्राप्तिलक्षणभेदसाध्यासाध्यज्ञानपुरस्सरं सापेक्षरोगविनिश्चयविवेकः ।

2. <u>सामान्यचिकित्सा</u>

समस्तरोगाणां चिकित्सासूत्राणि, कियाकमः, चिकित्सासिद्धान्तविवेकश्च । प्राच्यनव्यमतयोः आत्ययिकरोगाणां च चिकित्साकमः ।

3. <u>चरकसंहितायाः (निदान–कल्प–चिकित्सा–सिद्धिस्थानानि)</u>

विशेषाध्ययनम् कायचिकित्सावाङ्मयस्य परिचयः सेतिहासः ।

4. <u>अधोलिखितयोः वर्गयोः समाधेयः</u>

(1) रसायनतंत्रपरिचयः, रसायनसेवनविधीनां परिबोधः, रसायनस्य जराव्याधिप्रतिबंधकत्वं, वयःस्थापने जरानिराकरणे च प्रयुक्तानां विधीनां प्राच्यनव्यमतदृशा परिज्ञानम्। नव्यजरातुरीयविज्ञानस्य परिचयः, विविधौषधद्रव्याणां कल्पास्तत्प्रयोगविधिज्ञानम् आचाररसायनज्ञानसहितम्।

वाजीकरणस्याद्यत्वे महत्त्वं, वाजीकरणकर्मणः स्वरूपं, विभागाः तदुपयोगिद्रव्याणि च । क्लैब्यध्वजभंगव्यवायशोषशुक्रनाशादिरोगाणां निदान–सम्प्राप्ति–चिकित्साज्ञानं क्लीबकरणविधिज्ञानसहितम् ।

(2) पंचकर्मचिकित्सा, चिकित्सायां षट्कर्माणि , पंचकर्माणि च। शोधनीयानां पंचकर्मणां महत्त्वम्, पूर्वकर्मणोः स्नेहस्वेदयोः परिज्ञानं, पंचकर्मणां सैद्धान्तिकं व्यावहारिकं च परिज्ञानं, पंचकर्मणां प्रभावविवेकः, संशोधनार्हरोगिरोगविवेकः, संसर्जनकमः, पंचकर्मोपयोगिनाम् अग्रोपहरणीयद्रव्याणामुपकरणानां च परिज्ञानम् ।

<u>आलोच्यग्रंथाः –</u>

1. चरकसुश्रुतवाग्भटादिसंहितानामुपयोगिनोंऽशाः ।
2. माधवनिदानं मधुकोशव्याख्यासहितम् ।
3. आयुर्वेदीय व्याधिविज्ञान –यादवजीकृत
4. रोगीपरीक्षाविधि –आचार्यप्रियव्रत शर्मा
5. पंचकर्मविज्ञान –हरिदास श्रीधर कस्तूरे
6. चिकित्सादर्श –पं.राजेश्वरदत्त शास्त्री
7. कायचिकित्सा –रामरक्ष पाठक
8. चक्रदत्त ।
9. कायचिकित्सा के आधुनिक ग्रंथ ।

# 12 – प्रसूतितन्त्रं स्त्रीरोगाश्च

## 1. गर्भगर्भिणीशारीरम्

श्रोणिगुहा–योनि–गर्भाशयादिसमस्तस्त्रीप्रजननांगादीनां प्रकृतितः विकृतितश्च रचनाशारीरम्। आर्तवम्, ऋतुचक्रम्, अनुयोगिनों ऽ गरसाः, स्त्रीबींजं, पुंबीजं च । गर्भाधानं, पुंसवनं, गर्भोपादानानि, गर्भस्य षड्धात्वात्मकगर्भाभिनिर्वृत्तिः, मातृजादयो भावाः, भ्रूणाभिवृद्धिः, जननस्तराणां निर्माणं, जननस्तरैर्भाव्यवयवानामुद्भवः, गर्भे पंचमहाभूतानां स्रोतः, अवग्रहणक्रमश्च, पंचमहाभूतानां गर्भवृद्धौ कर्माणि, अंगानामवयवानां च पांचभौतिकत्वप्रतिपादनम् । गर्भवपनं, गर्भधराकला, जराय्वपरागर्भोदकनाभिनाडीप्रभृत्यादीनां निर्माणं कर्माणि विकाराणि च, गर्भस्य पोषणं गर्भशरीरक्रियावैशिष्ट्यं, गर्भलिंगोत्पत्तिः, गर्भस्य मासानुमासिकवृद्धिः, गर्भवर्णोत्पत्तिः, बीज–बीजभाग–बीजभागावयवजन्या अन्ये च गर्भांगविकाराः, प्रगल्भ–गर्भः, प्रगल्भ–गर्भस्य करोटि : ।

गर्भनिदानं, गर्भिण्याः गर्भकालीनविलक्षणतासम्बद्धानि लक्षणानि, मातृगतांगपरिवर्तनलक्षणानि दौहृदं च, गर्भसापेक्षनिदानं, गर्भायुनिर्णयः, गर्भसंख्यानिर्णयः, बह्वपत्यता च । गर्भिणीपरिचर्या, स्वस्थवृत्तं च, मासानुमासिकं पथ्यापथ्यं च ।

गर्भिण्याः गर्भजन्यान्यविकाराणां निदानपूर्वरूपरूपपुरस्सरं चिकित्सा च ।

## 2. प्रसूतितन्त्रम्

भूतहृतगर्भोपविष्टकोपशुष्कादिगर्भविकाराः, गर्भस्रावपातौ च, रक्तगुल्मः (मांसगर्भः मूढगर्भो वा), गर्भाशये इतरगर्भाधानम् । गर्भाशये गर्भस्याल्पवृद्धिः मृत्युश्च, प्रसवपूर्वरक्तस्रावः गर्भांऽगसंस्थिति–वयःस्थितिगर्भावतरणादयः । गर्भसंगः, मूढगर्भः, विकृतप्रसवै गर्भस्य विविधाः गतयः, योनिसंवरणम्, गर्भाशयक्रियाविकाराः, अपरासंगः, सामान्यप्रसवकालः, प्रसवस्य हेतवः, प्रसवस्य विविधावस्थाः, गर्भस्य प्राकृतनिष्क्रमणविधिः, प्राकृतप्रसवौपक्रमाः, प्रसवावस्थायां कर्माणि, अपरापरीक्षणम् । पूर्वकालिकातिकालिकप्रसवः, प्रसवोत्तररक्तस्रावः।

सूतिकागारः, सूतिकागारे प्रवेशः निवासश्च । सूतिका, सूतिकाकालः, सूतिकापरिचर्या, सूतिकारोगाश्च। नवजातशिशोः परीक्षणं परिचर्या च प्राकृतवैकृतस्तन्यं, तस्य चिकित्सा च।

## 3. स्त्रीरोगास्तेषां चिकित्सा शल्यकर्माणि च

स्त्रीजातानां सहजातोपसर्गादिजन्यसमस्तयोन्यार्तवादिरोगाणां निदानसम्प्राप्तिलक्षणपुरस्सरं चिकित्सा । बन्धयत्वं, योनिकन्दः, यौन्यर्शः, सोमरोगः, श्वेतप्रदरः, योनिगर्भाशयभ्रंशः, स्तनरोगाः, भगयौनिगर्भाशयडिम्बप्रणाल्यः, डिम्बग्रन्थ्याश्रितानि स्तनाश्रितानि च ग्रन्थ्यर्बुदानि, तेषां निदानसम्प्राप्तिलक्षणपुरस्सरचिकित्सा। गर्भनिरोधविधयः । उतरबस्तिपिचुवर्तिलेपधूपधावनदहनादिचिकित्साविधयः ।

सामान्यशल्यकर्मसिद्धान्ताः, गर्भाशयमुखविस्तृतिकरणं, गर्भाशयलेखनं, गर्भाशयमुखदहनं, स्वस्थाने योनिगर्भाशयस्थापनं, अर्शसां निर्हरणं, जननां  गेभ्यः ग्रन्थ्यर्बुदादिनिर्हरणं, गर्भाशयनिर्हरणं, शल्यनिर्हरणं, स्तनविद्रधिपाटनं च । मूलाधारच्छेदनं, मूलाधारविदारणं, मूढगर्भस्य निर्हरणं (योनिपथेन उदरपाटनेन वा) अपरापातनं गर्भपातनं च । बन्ध्याकरणं तदुपयोगियन्त्रशस्त्राणां ज्ञानम् ।

## 4. प्रसूतितंत्रवाङ्मयस्य परिचयः इतिहासश्च । काश्यपसंहितायाः विशेषाध्ययनम् ।

<u>आलोच्यग्रंथाः –</u>

1. चरकसंहितासुश्रुतसंहिताष्टांगहृदयादिग्रंथानां सम्बद्धांशाः ।
2. काश्यप संहिता
3. अभिनव प्रसूतितंत्र –अयोध्या प्रसाद अचल
4. अभिनवस्त्रीरोगविज्ञान –अयोध्या प्रसाद अचल
5. अभिनवस्त्रीरोगविज्ञान –डॉ. राजेन्द्र प्रसाद भटनागर

# 13 – कौमारभृत्यम्

1. <u>गर्भोपक्रमः</u>

   मातृज–पितृजादिभावाः, यज्जःपुरुषीयविमर्शः, गर्भवृद्धिक्रमः, गर्भस्य पोषणम्, गर्भविकाराः सहजाः विकृतहीनाधिकावयवादयः, कुलजाश्च मातृजाः पितृजाः विकाराः, बीज–बीजभाग–बीजभागावयवजन्याः विकाराश्च ।

2. <u>शिशुपरिचर्या शिशुपोषणं च ।</u>

   नवजातशिशोः प्राणानयनम्, नालच्छेदनम्, उल्वकनिर्हरणं गर्भोदकवमनं च, नवजातशिशोः शरीरक्रियाविज्ञानम्, नवजातशिशोः परीक्षणम्, जातकर्मसंस्कारः, अन्ये संस्काराश्चान्नप्राशनकर्णवेधादयः, कुमारागारम्, क्रीडाभूमिः, क्रीडनकानि, नवजातशिशोः प्राशनम्, स्तन्यसंपत्, स्तन्यदोषाः तेषां चिकित्सा च । धात्रीपरीक्षणम् बालानुरूपशारीरिकमानसिकवृद्धेः परिज्ञानम्, आहारविहारनिरूपणम्, रक्षाकर्माणि, शिशोर्वेदनायाः परिज्ञानम्, दन्तोद्भेदः, दन्तसम्पत्, तज्जन्यरोगाणां चिकित्सा, बालकेन सह परिवारस्येतरजनानां च सम्बन्धः, लेहनम्, व्याधिक्षमत्वोपक्रमः, स्तन्यानयनम्, समयपूर्वजातस्य नवजातशिशोः प्रबन्धः अतिकालोत्पन्ननवजातशिशो उपक्रमः।

3. <u>बालरोगाः</u>

   बालशोषः, पारिगर्भिकः फक्कः जलशीर्षकमन्ये च पोषणतत्त्वाभावजन्याः व्याधयस्तेषां निदानं चिकित्सा च ।

   कुकूणकसन्निरुद्धगुदनिरुद्धप्रकशश्च, गुदकण्टकम्, पोथकी, चर्मदलम्, विसर्पः, क्षीरालसकम्, उल्वकरोगः, छर्दिः,

   बालापस्मारः, अतिसारः, बालाक्षेपः, महापद्मरोगः, कृमिरोगाः, तालुकण्टकः, अजगल्लिका, जातहारिणी, ग्रहबाधाः,

   उत्फुल्लिका,रोहिणीत्येतेषां विकाराणां चिकित्सा नव्यदृष्ट्या च विविधबालरोगाणां परिचयः।

   कास–श्वास–ग्रहण्यतिसार–पक्षाघात–हृदयरोगादीनामन्येषां च व्याधीनां रोगविज्ञानपुरस्सरं सामान्यचिकित्सोपक्रमः ।

   पाण्डु–कामला–धनुस्तंभापतानकाक्षेपकादीनां निदानं चिकित्सा च । औषधानां मात्रा प्रयोगविधिश्च ।

   पंचकर्मनिषेधः, आत्ययिके व्याधौ प्रयोगविधिः, स्नेहस्वेदादीनां च प्रयोगविधीनां परिज्ञानम्।

4. कौमारभृत्यवाङ्मयपरिचयः सेतिहासः । काश्यपसंहितायाः विशिष्टाध्ययनम् ।

   <u>आलोच्यग्रंथाः –</u>

   1. चरकसंहिता
   2. काश्यपसंहिता
   3. हारीतसंहिता
   4. कुमार तंत्र समुच्चय – रमानाथ द्विवेदी

## 14 – पंचकर्म

1. <u>प्रथमं पत्रम् (सिद्धान्ताः पूर्वकर्माणि च)</u>

कायचिकित्सायाः सिद्धान्तानां परिज्ञानम् । चिकित्साभेदाः पंचकर्मणां परिचयात्मक इतिहासः । इतरचिकित्सापद्धतिसु शास्त्रेषु च शोधननिरूपणम् । षड्विध–द्विविधोपक्रमाः। पंचकर्मचिकित्सायां संशोधने च तेषां महत्त्वमुपयोगिता च । संशोधनीयाः पुरुषा :

रोगाश्च । संशोधनस्य फलम् । संशोधने प्रकृत्यादिविचारः, स्वास्थ्यसंरक्षणार्थे पंचकर्मोपयोगिता, त्रिविधकर्माणि–पूर्वकर्मप्रधानकर्म पश्चात्कर्माणि । शोधने पूर्वकर्मणो महत्त्वम् । स्नेहनस्य षड्विधोपक्रमे महत्त्वम्ः । शमनार्थे शोधनार्थे चाभ्यन्तरस्नेहविधिः । बाह्यस्नेहप्रकारास्तेषां सम्यक् परिज्ञानम् । स्नेहकर्मणः प्राधान्यं कार्मुकत्वं फलश्रुतिश्च ।

स्वेदनकर्मणः सुविस्तृतं सम्यक् परिज्ञानं, यथोक्तं चरकादिषु संहिताग्रंथेषु । स्वेदनोपयोगिद्रव्याणां सम्यग्ज्ञानं स्वेदनयंत्रोपकरणानां सम्यग्ज्ञानम् । स्वेदनस्य पूर्वकर्मपश्चात्कर्मणोश्च परिज्ञानसहितमनुसरणम् । स्वेदनकर्मप्रयोगकाले आहारविहारौ परिहारश्च ।

रोगानुसारं स्नेहस्वेदयोः विशिष्टः प्रयोगः । स्नेहस्वेदापचारजानां व्यापदां सिद्धिः, स्नेहस्वेदप्रयोगानन्तरं रोगिणां लक्षणिकं यांत्रिकं च परीक्षणम् ।

संहितासंग्रहग्रंथानां सम्बद्धाध्यायानां टीकासहितं विशेषाध्ययनम् ।

2. <u>द्वितीयं पत्रम् (वमन–विरेचन–विवेचनम्)</u>

